# Shri Sabhapati Stotram

# શ્રીસભાપતિસ્તોત્રમ્

## Document Information

Text title : Shri Sabhapati Stotram

File name : sabhApatistotram.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : Sivakumar Thyagarajan Iyer

Description/comments : 47 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

Latest update : September 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2023

*sanskritdocuments.org*

# શ્રીસભાપતિસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।
યત્કારુણ્યકટાક્ષવીક્ષણમહો જન્માદિદુઃખાપહં
યત્પાદામ્બુજસેવનં તનુભૃતાં સ્વાત્માવબોધાઙ્કુરં
યન્નામસ્મરણં કૃતાન્તપરિહૃત્ સંસારિણાં તારકં
તં વન્દે ગિરિજાસહાયમમલં શ્રીચિત્સભાનાયકમ્ ॥ ૧॥

લોકાનાહૂય સર્વાન્ ડમરુકનિનદૈર્ઘોરસંસારમગ્નાન્
દત્ત્વાભીતિં દયાલુઃ પ્રણતભયહરં કુઞ્ચિતં પાદપદ્મમ્ ।
ઉદ્ધૃત્યેદં વિમુક્તેરયનમિતિ કરાદ્ દર્શયન્ પ્રત્યયાર્થં
બિભ્રદ્ વહ્નિં સમાયાં કલયતિ નટનં યઃ સ પાયાચ્છિવો નઃ ॥ ૨॥

ન પરં પુરમસ્તિ પૌણ્ડરીકાચ્છિવગઙ્ગાસદૃશી ન કાપિ સિન્ધુઃ ।
અપિ હેમસભાનિભા ન ગોષ્ઠી નટરાજાદધિકો ન કોऽપિ દેવઃ ॥ ૩॥

ધિભૂતેરણુમાત્રેણ ત્રિકાલમનુલેપનમ્ ।
રોમ રોમ ભવેલ્લિઙ્ગં તચ્છરીરં શિવાલયમ્ ॥ ૪॥

આર્દ્રાયામરુણોદયસ્ય સમયે ચાપે ચ લગ્ને યુતે
પર્વં યુક્તમયુક્તમેવ નટનં સૃષ્ટ્યાદિમષ્ટોત્તરં (?) ।
........................
દેવૈર્દાનવમાનુષાઃ સહગણાઃ સંસેવ્ય મુક્તિપ્રદમ્ ॥ ૫॥

તેજો રૌદ્રમિદં શિવેન જગતો રક્ષાર્થમુત્પાદિતં
ભૂતપ્રેતપિશાચરોગશમનં કાલાગ્નિરુદ્રાત્ સ્વયમ્ ।
ઇષ્ટાર્થપ્રદમિષ્ટલોકગતિકૃત્ સિદ્ધ્યષ્ટકાપાદનં
ભસ્મેદં યદિ નિર્મલં ગુરુકૃપાલબ્ધં સદા રક્ષતુ ॥ ૬॥

શિવાચ્યુતભગે ઋક્ષે ચાપમેષયુગે રવૌ ।
કન્યાકુમ્ભચતુર્દશ્યાં સિતે સ્નાનં સભાપતેઃ ॥ ૭॥

ધન્યા કેયં સ્થિતા તે શિરસિ શશિકલા કિં નુ નામૈતદસ્યા
 નામૈવાસ્યાસ્તદેતત્ પરિચિતમપિ તે વિસ્મૃતં કસ્ય હેતોઃ ।
નારીં પૃચ્છામિ નેન્દું કથયતુ વિજયા ન પ્રમાણં યદીન્દુ-
 ર્દેવ્યા નિહ્નોતુમિચ્છોરિતિ સુરસરિતં શાઠ્યમવ્યાદ્ વિભોર્વઃ ॥ ૮॥

ભગવન્ ભૂતભવ્યેશ ન જાને હિતમાત્મનઃ ।
ત્વમેવ સઞ્ચિન્ત્ય વિભો હિતં મે દાતુમર્હસિ ॥ ૯॥

ઇતિ શ્રીસભાપતિસ્તોત્રં સમાપ્તમ્ ।
This stotra seems to be a collection of stray
verses connected with Shri Nataraja at Chidambaram.
The 8th verse is the nandIshloka of the mudrArAkShasa.

(૪૭)

Proofread by Sivakumar Thyagarajan Iyer

*Shri Sabhapati Stotram*

pdf was typeset on September 23, 2023

Please send corrections to *sanskrit@cheerful.com*